International Journal of Sanskrit Research 2016; 2(1): 54-55

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(1): 54-55
© 2016 IJSR
www.anantaajournal.com
Received: 22-11-2015
Accepted: 25-12-2015

**डॉ. दिनेश साह**
ग्राम+पो.– डोड़वार, भाया– जयनगर, जिला– मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. दिनेश साह**
ग्राम+पो.– डोड़वार, भाया– जयनगर, जिला– मधुबनी, बिहार, भारत

# संस्कृत साहित्यम् काव्यस्थमस्त्वम्

**डॉ. दिनेश साह**

**सारांश**
काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम्। केचन मम्मट केचन विश्वनाथं केचन च जगन्नाथं साधिष्ठं मन्यन्ते। सर्वविषयावगाहित्वेन मम्मटलक्षणं साधिष्ठम्, सुगमार्थतया रसस्य मुख्यत्वेन च विश्वनाथः, अभिव्यक्तेः कलापक्षस्य कल्पनापक्षस्य चोद्‌भावनया जगन्नाथः सर्वातिशायी। जगन्नाथ–लक्षणं पाश्चात्त्यकाव्य–तत्त्वज्ञैः साम्यं भजते। कल्पनानुभूतिजन्य–विचाराणां मधुराभिव्यक्ति–कलैव कवितेति साधिष्ठा व्याख्या। तद्यथा–

**प्रस्तावना**

भावानुभूतिमद् वाक्यं रसवद् ध्वनिसङ्गतम्।
गुणालंकारसंजुष्टं काव्यं रम्यार्थद्योतकम्।। (कपिलस्य)

**काव्यस्योद्देश्यम्–** असारेऽस्मिन् संसारे दुःख–दावाग्नि–दग्धस्य आधिव्याधिप्रपीडितस्य पापादिविषण्णस्य मायामोह–भ्रान्तचेतसो मानववृन्दस्य मनःसन्तापनिवारणाय चेतःप्रसादाय सुखावातये च विद्वद्धौरेयाः तत्त्वज्ञाः काव्यशास्त्रनामकं रत्नं वाङ्मयमहोदधेः सारभूतम् उददीधरन्। रत्नमेतत् चतुर्वर्गावाप्तिसाधनं ब्रह्मानन्दसहोदरं रसम् आस्वाद्यतया जनयद् गौरवम् अलभत। काव्यं हि यशसेऽर्थलाभाय व्यवहारज्ञानाय पापविनाशाय परमानन्दलाभाय कान्तासंमित–कर्तव्योपदेशाय च प्रशस्यते। उक्तं च मम्मटेन–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यःपर–निर्वृतये कान्तासंमिततयोपदेशयुजे।।(1)

काव्यं हि नवरसरुचिरत्वाद् नियतिकृतनियमरहितत्वाद् आह्लादजनकत्वाद् अनन्यपरतन्त्रत्वाद् ब्रह्मकृतां सृष्टिमपि अतिशेते। एतदेव विशदीक्रियते मम्मटेन–

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।(2)

**काव्यलक्षणम्–** किं तावत् काव्यमिति विचारचर्चायाम् अनेकानि काव्यलक्षणानि दृष्टिपथम् अवतरन्ति। परमद्यावधि नैकमपि लक्षणं निर्दुष्टं सर्वसंमतं वा। भरतस्य नाट्यशास्त्रे प्राचीनतमं लक्षणम् उपलभ्यते–

मृदु–ललित–पदाढ्यं गूढशब्दार्थहीनं
जनपदसुखबोध्यं युक्तिमन्नृत्ययोग्यम्।
बहुकृतरसमार्गं सन्धि–सन्धान–युक्तं
भवति जगति योग्यं नाटकं प्रेक्षकाणाम्।।(3)

अत्र मुख्यतो दृश्यकाव्यमेव परिभाष्यते। अग्निपुराणे सर्वप्रथम काव्यलक्षणं निर्दिश्यते–

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम्।।(4)

अत्र काव्यस्य पञ्च तत्त्वानि स्वीक्रियते–इष्टार्थः, संक्षिप्तं वाक्यम्, अलंकाराः, गुणाः, दोषाश्चेति। एतेन काव्यस्य बाह्यरूपरेखा. स्फुटीभवति।
क्षेमेन्द्रश्च औचित्यविचारचर्चायाम् 'औचित्यं काव्यजीवितम्' इति साधयति। उक्तं च तेन–

काव्यस्यालमलङ्कारैः किं मिथ्यागुणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते।।
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।[5]

**मम्मटः–** काव्यशास्त्रे मुख्यत्वेन आचार्यमम्मटस्य लक्षणं स्वीक्रियते उद्धियते प्रस्तूयते च–

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**[6]
लक्षणमेतत् काव्यस्य स्वरूपं सर्वाङ्गत्वेन व्यवस्थापयति। अतएव काव्यशास्त्रज्ञैर्लक्षणमेतद् वाहुल्येन स्वीक्रियते। अत्र पूर्वाचार्यैः स्वीकृतं शब्दार्थयोर्महत्त्वं पूर्ववद् उपस्थाप्यते। काव्ये प्रसादादिगुणानां महत्त्वमत्र स्वीक्रियते। काव्ये उत्कटदोषाभावेऽपि विशेषतोऽवधानं दत्तम्। 'अनलकृती पुनः कापि' इत्यनेनालंकाराणां गौणत्वं प्रतिपाद्यते। तदभावेऽपि न काव्यत्वक्षतिः। आचार्यो मम्मटः–

इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।[7]

इत्यनेन ध्वनेर्महत्त्वमप्युपपाद्यते। आचार्यो हेमचन्द्रोऽपि काव्यानुशासने प्रकारान्तरेण मम्मटाभिमतं काव्यलक्षणमेव निर्दिशति।

अदोषौ सगुणौ सालङ्कारौ च शब्दार्थो काव्यम्।[8]

**विश्वनाथः–** आचार्य–विश्वनाथस्य काव्यलक्षणं प्रायो विद्वद्भिः प्रशस्यते–

**वाक्यं रसात्मकं काव्यम्।**[9]
'रस एवात्मा साररूपतया जीवनाधायको यस्य। तेन विना तस्य काव्यत्वाभावस्य प्रतिपादितत्वात्। 'रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते।'
अत्र ध्वनिकारैः प्रतिपादितो रसध्वनिरेव काव्यत्वेन स्वीक्रियते। अग्निपुराणेऽपि रसस्य महत्त्वं प्राप्यते– 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्। भरतेनाप्युच्यते– 'नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते।' एवं विचार्यते चेत् तर्हि ज्ञायते यद् विश्वनाथेन पूर्वाचार्यैः अङ्गीकृतं काव्यस्य रसात्मकत्वं स्फुटं प्रतिपादितम्। तैत्तिरीयोपनिषदि 'रसो वै सः' इति ब्रह्म रसरूपेण प्रतिपाद्यते, तत्प्राप्तिसाधनत्वेन काव्यमपि रसात्मकमिष्यते। 'रस्यते आस्वाद्यते इति रसः' इति लक्षणयन् आचार्यो– भरतः काव्यम् आस्वादनीयं मनुते। एवमपि विश्वनाथकृतं लक्षणम् उचितं प्रतिभाति।

**जगन्नाथः–** रसगङ्गाधरकर्तुः पण्डितराजजगन्नाथस्यापि काव्यलक्षणं बहुसंमतम् आदरास्पदं च–
पण्डितराज जगन्नाथं विहाय प्रायः सर्वैरपि पूर्वाचार्यैः काव्यलक्षणे शब्दार्थयोः द्वयोरपि संकलनं विधीयते। प्राचीनाचार्यो भामहः काव्यालंकारे काव्यलक्षणम् अभिधत्तेः–

**शब्दार्थौ सहितौ काव्यम्।**[10]
वामनादिभिरपि शब्दार्थयोः काव्यत्वं स्वीक्रियते। तद् यथा–
काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते।
शब्दार्थौ काव्यम्।
अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम्।
शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ च काव्यम्।
गुणालंकार–सहितौ शब्दार्थो दोषवर्जितौ।
शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिः।
शब्दार्थयोः समन्वयः काव्यमिति। अर्थानुकूलं शब्दप्रयोगः, शब्दानुरूपं चार्थ इति अत्राभिमतम्। आचार्यो दण्डी भामहस्य 'शब्दार्थौ' इति विशदयन् आह–

**शरीरं तावदिष्टार्थ–व्यवच्छिन्ना पदावली।**[11]
अत्र शब्दार्थयोः समन्वयेन काव्यस्य शरीरमेव निर्धार्यते। अतएव आनन्दवर्धनाचार्य 'शब्दार्थशरीरं तावत् काव्यम्' इति व्याहरन् शब्दार्थयोः पृथक् काव्यस्य आत्मानं मनुते। काव्यस्य शरीरज्ञानेऽपि तत्र 'कः आत्मा' इति न निश्चप्रचं ज्ञायते।

**काव्यस्य आत्मा–** परवर्तिभिराचार्यैः 'क' काव्यस्य आत्मा' इति गवेषयद्भिर्बहधा स प्रस्तुयते। वामनः 'रीतिरात्मा काव्यस्य' इति निगदन रीतिमेव काव्यात्मरूपेण स्वीकरोति। रीतिशब्देन शैली भाषासौन्दर्यं सालंकृतित्वं चाभीष्यते। वामनेनोच्यतेः–
काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वतेते, भक्त्या तु शब्दार्थमात्रवचनो गृह्यते।
उद्भटोऽपि गुणालकारयोः समरूपेण काव्ये स्थिति स्वीकरोति। रुद्रटः 'शब्दार्थौ काव्यम्' इति अभिदधत् काव्ये शब्दार्थयोर्महत्त्वं निर्दिशति।
आनन्दवर्धनाचार्यः 'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समानातपूर्वः०'[12] इति व्याहरन् ध्वनिमेव काव्यस्यात्मरूपेण प्रतिपादयति।
राजशेखरः काव्यमीमांसायां काव्यपुरुषं साङ्गोपाङ्गं प्रस्तौति।
शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्, प्राकृतं बाहुः,.......रस आत्मा, रोमाणि छन्दांसि, अनुप्रासोपमादयश्च त्वामलंकुर्वन्ति।[13]
अत्र 'रस आत्मा' इत्यनेन काव्ये रसस्य आत्मत्वम् ऊरीकरोति। आचार्यः कुन्तकः 'वक्रोक्तिः काव्यजीवितम्' इति साधयति। उच्यते च तेन–

शब्दार्थौ सहितौ वक्र–कविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदालादकारिणि।।[14]
रमणीयार्थप्रतिपादकः शब्दः काव्यम्।[15]

**निष्कर्ष**
अत्राभिव्यक्तेः प्राधान्यम्, स्फुटं सुन्दरं सहदयग्राहि च वर्णनं काव्यस्य मुख्यता स्वीक्रियते। जगन्नाथो रमणीयार्थप्रतिपादकं शब्दमेव काव्यं मनुते, न चार्थम्। 'तस्माद् वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्द–निष्ठतैवोचिता' इति व्याहरता तेन शब्दस्यैव काव्यत्वं प्रतिपाद्यते। तस्य टीकाकारो नागेश भट्टः शब्दार्थयोः काव्यत्वं साधयन् मम्मटं समर्थयति– 'तेनानुपहसनीयकाव्यत्वलक्षणं प्रकाशोक्तं निर्बाधम्' इति।

**संदर्भा :**

1. काव्य० 1.2
2. काव्य 1.9
3. नाट्यशास्त्र
4. अग्निपुराण 337.607
5. औचित्य० 4.5
6. काव्यप्रकाश 1.4
7. काव्य० 1.4
8. काव्यानु०
9. सा० दर्पण 2.3
10. काव्यालंकार 1.1.6
11. काव्यादर्श 1.10
12. ध्वन्यालोक 1.1
13. काव्यमीमांसा, पृ.– 14
14. वाक्रोक्ति० 1.7
15. रसगङ्गधर, पृ